अस्या ध्यानं यथा,—
"प्रत्यालीढ़पदार्पिताङ्घ्रिशववद्घोराट्टहासा परा
खड्गेन्दीवरकर्त्तृखर्परभुजा हूङ्कारबीजोद्भवा।
खर्व्वा नीलविशालपिङ्गलजटाजूटैकनागैर्युता
जाड्यं न्यस्य कपालके त्रिजगतां हन्त्युग्रतारा-
स्वयम् ॥"
अपि च।
"प्रत्यालीढ़पदां घोरां मुण्डमालाविभूषिताम्।
खर्व्वां लम्बोदरीं भीमां व्याघ्रचर्म्मावृतां कटौ ॥
नवयौवनसम्पन्नां पञ्चमुद्राविभूषिताम्।
चतुर्भुजां ललज्जिह्वां महाभीमां वरप्रदाम् ॥
खड्गकर्त्तृसमायुक्तसव्येतरभुजद्वयाम्।
कपालोत्पलसंयुक्तसव्यपाणियुगान्विताम् ॥
पिङ्गोग्रैकजटां ध्यायेन्मौलावक्षोभ्यभूषिताम्।
बालार्कमण्डलाकारलोचनत्रयभूषिताम् ॥
ज्वलच्चितामध्यगतां घोरदंष्ट्रां करालिनीम्।
सावेशस्मेरवदनां स्त्र्यलङ्कारविभूषिताम् ॥
विश्वव्यापकतोयान्तःश्वेतपद्मोपरिस्थिताम् ॥"
अस्या दशाक्षरमन्त्रोक्तध्यानं यथा,—
"श्यामवर्णां त्रिनयनां द्विभुजां वरपङ्कजे।
दधानां बहुवर्णाभिर्बन्धूकपाभिरावृताम् ॥
शक्तिभिः स्मेरवदनां स्मेरमौक्तिकभूषणाम्।
रत्नपादुकयोर्न्यस्तपादाम्बुजयुगां स्मरेत् ॥"
इति तन्त्रसारः ॥
(अस्या बीजं यथा, "ह्रीँ स्त्रीँ हुँ फट् ॥")

तारापतिः, पुं, (तारायाः पतिः।) शिवः। चन्द्रः। (यथा, राजेन्द्रकर्णपूरे। २७।
"शान्तध्वान्तकलङ्क शङ्करशिखालङ्कार तारापते राकाकान्त सविभ्रमं भ्रम सदा निःशङ्कमङ्के दिवः ॥")
बृहस्पतिः। वाली। सुग्रीवः। इति पुराणम् ॥ (यथा, नैषधे। १६। ८।
"व्रजति कुमुदे दृष्ट्वा मोहं दृशोरपिधायके
भवति च नखे दूरं तारापतौ च हतौजसि।
लघु रघुपतेर्भार्य्यां मायामयीमिव रावणि-
स्तिमिरचिकुरग्राहं रात्रिं हिनस्ति गभस्ति-
राट् ॥")

तारापथः, पुं, (ताराणां नक्षत्राणां पन्थाः। समासे अः।) आकाशः। इति हलायुधः ॥ (देशविशेषः। यथा, रघुः। १५। ९०।
"अङ्गदं चन्द्रकेतुञ्च लक्ष्मणोऽप्यात्मसम्भवौ।
शासनात् रघुनाथस्य चक्रे तारापथेश्वरौ ॥"
"कारापथेश्वरौ।" इति वा पाठः ॥)

तारापीड़ः, पुं, (ताराणां नक्षत्राणां आपीड़ो भूषणमिव।) चन्द्रः। इति त्रिकाण्डशेषः ॥ (स्वनामख्यातचन्द्रापीड़स्य राज्ञो भ्राता। यथा, राजतरङ्गिण्याम्। ४। ४३।
"तारापीड़ोऽपि तनयः क्रमात् तस्यामजायत॥"
कादम्बरीकथितनायकविशेषः। यथा, कादम्बर्य्याम्। १०२ पत्रे। "अवतार इव धर्म्मस्य प्रतिनिधिरिव पुरुषोत्तमस्य परिहृतप्रजापीड़ो राजा तारापीड़ोऽभवत् ॥")

ताराभूषा, स्त्री, (तारा नक्षत्राणि भूषा भूषणं यस्याः।) रात्रिः। इति राजनिर्घण्टः ॥

ताराभ्रः, पुं, (तारो निर्म्मलोऽभ्र इव। शुक्लवर्णत्वादस्य तथात्वम्।) कर्पूरः। इति राजनिर्घण्टः ॥ (विवरणमस्य कर्पूरशब्दे द्रष्टव्यम् ॥)

तारामण्डलः, पुं, (ताराणां मुक्तानां मण्डलं यत्र।) ईश्वरगृहविशेषः। इति शब्दरत्नावली ॥ (नक्षत्रमण्डले, क्ली ॥)

तारारिः, पुं, (तारस्य रूप्यस्य अरिः। एतत्संसर्गेण रूप्यस्य चाकचिक्यादिकं विनश्यतीत्यतोऽस्य तथात्वम्।) विटमाक्षिकः। इति हेमचन्द्रः। ४। १२१ ॥

तारावती, स्त्री, चन्द्रशेखरराजपत्नी। सा च ककुत्स्थराजेन तत्पत्न्यां मनोन्मथिन्यां जाता। असौ गिरिजांशजा। यथा,—
"इक्ष्वाकुवंशजो राजा ककुत्स्थो नाम धार्म्मिकः।
भोगवत्याङ्ग्यायाञ्च पुर्य्यां रिपुनिसूदनः ॥
सर्व्वलक्षणसम्पन्नो भूपालगुणसंयुतः।
तस्य भार्य्या महाभागा भर्गदेवस्य पुत्त्रिका ॥
सा मनोन्मथिनी नाम्ना पूजिता पतिवल्लभा।
तस्याः पुत्त्रशतं जज्ञे देवगर्भाभमच्युतम् ॥
बलवीर्य्यसमायुक्तं ककुत्स्थनृपसत्तमात्।
पुत्त्री न विद्यते तस्यास्तदर्थं सा गृहान्तरे ॥
निभृतं स्थण्डिलं कृत्वा चण्डिकां समपूजयत्।
पूज्यमाना महादेवी चण्डिका राजभार्य्यया ॥
प्रसन्ना सा त्रिभिर्व्वर्षैस्तां स्वप्ने चाब्रवीदिदम्।
योषिल्लक्षणसंयुक्ता सार्व्वभौमस्य भाविनी ॥
नक्षत्रमालया युक्ता पुत्त्री तव भविष्यति।
सापि स्वप्ने वरं प्राप्य मुदिताभून्नृपाङ्गना ॥
पार्व्वत्यपि स्वयं तस्या गर्भे काले विवेश ह।
सा मनोन्मथिनी देवी प्रवृत्ते ऋतुसङ्गमे ॥
गर्भं दधौ महासत्त्वं चन्द्रिकेवाम्ब्रतोत्करम्।
सम्पूर्णे तु ततः प्राप्ते तदा नक्षत्रमालिनीम् ॥
सा मनोन्मथिनी देवी सुषुवे तनयां शुभाम्।
तां दृष्ट्वा हारसंयुक्तां शरज्ज्योत्स्नोपमां
शुभाम् ॥
ककुत्स्थो भार्य्यया सार्द्धमत्यन्तमुदितोऽभवत्।
सहजेनाथ हारेण भूषिता सा ककुत्स्थजा ॥
ववृधे मन्दिरे तस्य वर्षास्विव सुरापगा।
तेनैव हारचिह्नेन तस्यास्तारावतीति वै ॥
नामाकरोत् पिता काले यथोक्ते नृपसत्तमः।
कालक्रमेण सा बाल्यं व्यतीत्य वरवर्णिनी ॥
मञ्जुलं यौवनोद्भेदं प्राप श्रीरिव माधवे।
तस्यास्तु यौवनोद्भेदं दृष्ट्वा राजा सुतैः सह ॥
ककुत्स्थः कारयामास समयेऽथ स्वयंवरम्।
माधवे मासि संप्राप्ते चन्द्रवृद्धौ शुभे दिने ॥
स्वयंवरसभां चक्रे तारावत्याः पिता सुतैः।
वार्त्तिकान् सुबहून् राजा वड़वाभिः क्रमेण वै ॥
तूर्णं प्रस्थापयामास नानादेशनृपान् प्रति।
ते राजानस्तथा श्रुत्वा वार्त्तां वै वार्त्तिकाननात् ॥
तूर्णमेव समाजग्मुस्तारावत्याः स्वयंवरम्।
तत् श्रुत्वा पौष्यतनयश्चतुरङ्गबलैर्युतः ॥
स्वयंवरं जगामाशु देवालङ्कारमण्डितः।
एतस्मिन्नन्तरे राज्ञः कुमारी वरवर्णिनी ॥
वृद्धां धात्रीं निजां सम्यक् सम्पूर्णज्ञानशालिनीम्।
स्वयंवरसभां द्रष्टुं प्राहिणोत् सदसं प्रति ॥
स्वयंवरसभां गत्वा चारुरूपं सुलक्षणम्।
नृपं निरूप्य भो धात्रि! मह्यमेत्य निवेदय ॥
एवं तां प्रेषयित्वाथ धात्रीं नृपतिपुत्त्रिका।
सा मनोन्मथिनी यत्र प्राराधयति चण्डिकाम् ॥
तत्र प्रायान्महाभागा शुभा तारावती तदा।
तत्र गत्वा महादेवीं प्रणम्य कालिकाङ्कथाम् ॥
मानुषेणाथ भावेन न ज्ञात्वात्मानमात्मना।
प्रणनाम महाभक्त्या वाक्यञ्चैतदुवाच ह ॥
प्रणमामि महामायां योगनिद्रां जगन्मयीम्।
सा मे प्रसीदतां गौरी चण्डिका भक्तवत्सला।
यदि सत्यं जनन्या मे मदर्थे त्वं प्रपूजिता।
तेन सत्येन सुभगः पतिर्म्मम नृपोत्तमः ॥
स्वयंवरेऽद्य भवतु प्रसीद हरवल्लभे!।
इति तस्या वचः श्रुत्वा चण्डिका हरमोहिनी ॥
मोहयन्ती नृपसुतां यथात्मानं न वेत्ति च।
अथ प्राहाङ्गशम्भूर्त्तिरिदं सा स्फुटं वचः ॥
श्रीदेव्युवाच।
पौष्यस्य तनयो योऽसौ नाम्ना तु चन्द्रशेखरः।
स मनोहररूपस्ते प्रियः स्वामी भविष्यति ॥
तमिन्दुकलया शीर्षे चिह्नितं नृपसत्तमम्।
वरयस्व रवारोहे पार्व्वतीव वृषध्वजम् ॥
अथाजगाम सा धात्री निरूप्य सदृशं पतिम्।
तारावत्यास्तदाचष्ट रहस्यं नृपसत्तमम् ॥
दृष्ट्वा तामागतां धात्रीं प्रहृष्टा नृपतेः सुता।
पप्रच्छ निभृतं कीदृक् को वा दृष्टस्त्वया नृपः ॥
सा प्राह धात्री वचनात्तव भूपा विलोकिताः।
चारुरूपाः कुलीनाश्च शास्त्रे शस्त्रे च पारगाः॥"
"नृपौ पुनर्म्महासत्त्वौ सिंहस्कन्धौ बृहद्भुजौ।
सर्व्वलक्षणसम्पन्नौ देवालङ्कारमण्डितौ ॥
तयोरपि वयःस्थत्वात् प्रशस्तश्चन्द्रशेखरः।
स एव ते पतिर्योग्यश्चिह्नेनानेन सुन्दरि! ॥
तं त्वं वरय राजानं तव योग्यं शुभोदयम्।
धात्र्यास्त्वेवं वचः श्रुत्वा राजपुत्त्री जगाद ताम् ॥
मत्पार्श्वचारिणी भूत्वा निर्देशय नृपोत्तमम्।
सावतीर्य्य तदा याप्ययानात्तारावती तदा ॥
धात्र्या चानुगया युक्ता व्यचरत् सदसोऽन्तरे।
सभामध्ये चिरं सा तु विहृत्य वरवर्णिनी ॥
भावित्वान्नियतेर्योगाच्चण्डिकायाः प्रसादतः।
तयोः समत्वादेकत्वात्तया धात्र्या विबोधिता ॥
इति खेदजघर्म्माम्भःकणिकानिचितानना।
पतिं पूर्व्वतरं पुत्त्री राज्ञान्तारावती सती ॥
स्वयं सा पार्व्वती देवी वव्रे च चन्द्रशेखरम्।
वैवाहिकेन विधिना स राजा चन्द्रशेखरः ॥
तारावतीं तदा भार्य्यां ककुत्स्थनृपतेः सुताम्।
संस्कृत्य स्नापयामास देवेभ्यो वैदिकैर्मखैः ॥
पाणिग्रहणसंस्कारं कृत्वा तां सहचारिणीम्।
करवीरपुरायाशु प्रययौ चन्द्रशेखरः ॥"
इति कालिकापुराणे ४८ अध्यायः ॥